"स मन्थरावल्गित-पीवरस्तनीः
परिश्रमक्लान्तविलोचनोत्पलाः ।
निरीक्षितुं नोपरराम वल्लवी-
रभिप्रनृत्ता इव वारयोषितः ॥")

वल्लिः, स्त्री, ( वल्लते संवृणोति वृक्षादीनिति । वल्ल + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इतीन् । ) लता । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । १२ । १८४ । १३ ।
"वल्लिर्वेष्टयते वृक्षं सर्व्वतश्चैव गच्छति ॥")
पृथिवी । इति शब्दमाला ॥

वल्लिकण्टकारिका, स्त्री, (वल्लिरूपा कण्टकारिका ।) अग्निदमनीक्षुपः । इति राजनिर्घण्टः ॥

वल्लिदूर्व्वा, स्त्री, ( वल्लिरूपा दूर्व्वा । ) मालादूर्व्वा । इति राजनिर्घण्टः ॥

वल्लिशाकटपोतिका, स्त्री, ( वल्लिप्रधाना शाकटपोतिका । ) मूलपोती । इति राजनिर्घण्टः ॥

वल्लिसूरणः, पुं, ( वल्लिप्रधानः सूरणः । ) अत्यम्लपर्णी । इति राजनिर्घण्टः ॥

वल्ली, स्त्री, ( वल्लि + ङीष् । ) लता । इत्यमरः ॥ सा च भूमिप्रसारा वर्षमात्रस्थायिनी कुष्माण्डाद्या । ( यथा च ।
"विदारीसारिवारजनीगुडूच्योऽजश्टङ्गीचेतिवल्लीसंज्ञः ॥" इति सुश्रुते सूत्रस्थाने ३८ अध्यायः ॥ यथा च, रामायणे । २ । ८० । ६ ।
"लतावल्लीश्च गुल्मांश्च स्थानूनश्मन एव च ।
जनास्ते चक्रिरे मार्गं छिन्दन्तो विविधान्
द्रुमान् ॥")
अजमोदा । इति मेदिनी । ले,३८ ॥ कैवर्त्तिका । चव्यम् । इति राजनिर्घण्टः ॥

वल्लीगड़ः, पुं, ( वल्लीरूपो गड़ः । ) मत्स्यविशेषः । भोला इति वालिकड़ा इति च भाषा । अस्य गुणाः । लघुत्वम् । रूक्षत्वम् । अनभिष्यन्दित्वम् । मरुत्करत्वम् । सर्य्यत्वम् । कफनाशनत्वञ्च । इति राजवल्लभः ॥

वल्लीजं, क्ली, ( वल्ल्यां लतायां जायते इति । जन + डः । ) मरीचम् । इति राजनिर्घण्टशब्दचन्द्रिके ॥ (यथा, वृहत्संहितायाम् ।८।१३।
"भाद्रपदे वल्लीजं निष्पत्तिं याति पूर्व्वशस्यञ्च ॥")

वल्लीबदरी, स्त्री, ( वल्लीरूपा बदरी । ) भूबदरी । इति राजनिर्घण्टः ॥

वल्लीमुद्गः, पुं, (वल्लीषु जातो मुद्गः ।) मकुष्ठकः । इति राजनिर्घण्टः ॥

वल्लीवृक्षः, पुं, (वल्लीवत् दीर्घो वृक्षः ।) सालवृक्षः । इति राजनिर्घण्टः ॥

वल्लुरं, क्ली, ( वल्ल्यते आव्रियते लतादिनेति । वल्ल + बाहुलकात् ष्उरच् । ) कुञ्जम् । मञ्जरी । क्षेत्रम् । निर्जलस्थानम् । शाद्वलः । इति हेमचन्द्रः ॥ गहनम् । इति मेदिनी । रे, २१० ॥ विश्वधररत्नावलीषु वल्लरमिति पाठः ॥

वल्लूरं, त्रि, (वल्ल्यते संव्रियते इति । वल्ल + "खर्ज्जिपिञ्जादिभ्य ऊरोलचौ ।" उणा० ४ । ९० । इति ऊरच् । ) आतपादिना शुष्कमांसम् । इत्यमरः । २ । ६ । ६३ ॥ ( तस्याभक्ष्यत्वं यथा, मनुः । ५।१३ ।
"निमन्त्रतश्च मत्स्यादान् सौनं वल्लूरमेव च ॥"
"वल्लूरं शुष्कमांसम् ।" इति तट्टीकायां कुल्लूकभट्टः ॥ ) शूकरमांसम् । इति मेदिनी । रे, २१० ॥ वनक्षेत्रम् । वाहनम् । ऊषरभूमिः । इति हेमचन्द्रः ॥

वल्ल्या, स्त्री, (वल्ल + भावे घञ् । वल्लाय संवरणाय साधुः । वल्ल + यत् । ) धात्रीवृक्षः । इति हारावली ॥

व(ब)ल्वजः, पुं, ( वल्वे पर्व्वते जायते इति । जन् + डः । ) उलपः । इति हेमचन्द्रः ॥ वाव इति ख्यातत्टणम् । इत्यमरः ॥ वलते भुवं वेष्टयति विशादित्वात् वप्रत्यये वल्वः पर्व्वतः तत्र जाता वल्वजाः इत्यन्ये । स्वभावात् बहुत्वे वल्वजाः । एको वल्वज इति भाष्यकारवचनादेकत्वमपि अतएव सुमनोऽप्सरोवल्वजादेर्व्वेति पाक्षिकबहुत्वार्थं क्रमदीश्वरसूत्रम् । इति तट्टीकायां भरतः ॥ (यथा, मनुः । २ । ४३ ।
"मुञ्जालाभे तु कर्त्तव्याः कुशाश्मान्तकवल्वजैः ।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥")

व(ब)ल्वजा, स्त्री, (वल्वे पर्व्वते जायते इति । जन + डः । टाप् । ) तृणविशेषः । सावे वागे इति हिन्दी भाषा । तत्पर्य्यायः । दृढ़पत्री २ तृणेक्षुः ३ तृणवल्वजा ४ मौञ्जीपत्रा ५ दृढ़तृणा ६ पानीयाश्रा ७ दृढ़क्षुरा ८ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । पित्तदाहतृषापहत्वम् । वातप्रकोपणत्वम् । रुच्यत्वम् । कण्ठशुद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥

वल्ह, क त्विषि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् । ) क, वल्हयति । त्विषि दीप्तौ । इति दुर्गादासः ॥

वल्ह, ङ श्रेष्ठे । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-अक०-सेट् । ) ङ, वल्हते धनी श्रेष्ठः स्यादित्यर्थः ।

वश, लु स्पृहि । इति कविकल्पद्रुमः ॥ ( अदा०-पर०-सक०-सेट् । ) लु, वष्टि धनं लोकः । इति दुर्गादासः ॥

वशं, क्ली, ( वश + "वशिरण्योरुपसंख्यानम् ।" ३ । ३ । ५८ । इत्यस्य वार्त्तिकोक्त्या अप् । ) इच्छा । प्रभुत्वम् । आयत्तता । इति शब्दरत्नावली ॥ ( यथा, महाभारते । १२ । १३४ । ७ ।
"वशे बलवतां धर्म्मः सुखं भोगवतामिव ॥")

वशंवदः त्रि, ( वशं तवाहं वश इति वाक्यं वदतीति । वश + वद + "प्रियवशे वदः खच् ।" ३ । २ । ३८ । इति खच् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् ।) वशं वदति यः । आयत्तकरवाक्यवक्ता । इति मुग्धबोधव्याकरणम् ॥ ( वशीभूतः । यथा, राजतरङ्गिण्याम् । ४ । ३६५ ।
"स जहार दुराचारो भूभृत् लोभवशंवदः ॥")

वशः, त्रि, (वष्टीति । वश + अच् ।) आयत्तः । इति शब्दरत्नावली । (यथा, कथासरित्सागरे ।८।१७।
"गुणाढ्योऽपि तदाकर्ण्य सद्यः खेदवशो-
ऽभवत् ॥")

वशः, पुं, ( वश + भावे अप् । ) इच्छा । इति संकीर्णवर्गे अमरः ॥ ( उश्यते इष्यते इति । वश + कर्म्मणि अप् । ) वेश्यागृहम् । आयत्तता । प्रभुत्वम् । इति त्रिकाण्डशेषः ॥ जन्म । इति हेमचन्द्रः ।

वशका, स्त्री, ( वशेन आयत्ततया कायति शोभते इति । कै + कः । ) वश्या नारी । इति शब्दरत्नावली ॥

वशक्रिया, स्त्री, (वशस्य क्रिया करणम् ।) वशीकरणम् । तत्पर्य्यायः । संवदनम् २ । इत्यमरः ॥ मणिमन्त्रौषधैर्व्वशीकरणं संवदनं संपूर्व्वो वदिर्व्वशीकरणे भावेऽनट् । संवदना च इति केचित् । करणेऽनटि वशक्रियासाधने मणिमन्त्रादावपि । जयश्रियः संवदनं यतस्तदिति रघुः । संवननं इति पाठान्तरम् । इति तट्टीकायां भरतः ।

वशगा, स्त्री, ( वशं गच्छतीति । गम + डः । ) वशीभूता । इति शब्दरत्नावली ॥ ( यथा, वृहत्संहितायाम् । ४३ । ३२ ॥
"गाङ्गादिवाकरसुताजलचारुहारां
धात्रीं समुद्ररसनां वशगां करोति ॥"
अस्मिन्नर्थे वाच्यलिङ्ग एवायं शब्दः । यथा, महाभारते । ४ । ६ । १२ ।
"इदानि ते हन्त वरं यमिच्छसि
प्रशाधि मत्स्यान् वशगोऽस्म्यहं तव ॥")

वशा, स्त्री, ( वश स्पृहि + अच् । टाप् । "वशिरण्योरुपसंख्यानम् ।" इति अप् वा ।) वन्ध्या । ( अस्या धनं राज्ञा रक्षितव्यम् । यथा, मनुः । ८ । २८ ।
"वशाऽपुत्त्रासु चैवं स्याद्रक्षणं निष्कुलासु च ।
पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च ॥")
सुता । योषा । स्त्रीगवी । करिणी । इति मेदिनी । शे, १३ ॥ ( यथा, कथासरित्सागरे । ६।११० ।
"असिच्यत स ताभिश्च वशाभिरिव वारणः ॥")
वन्ध्या गवी । इत्यमरः । (यथा, ऋग्वेदे ।२।७।५।
"त्वं नो असि भारताग्ने वशाभिरुक्षभिः ।"
"वशाभिर्व्वन्ध्याभिर्गोभिः ।" इति तद्भाष्ये सायणः ॥ वशीभूता । यथा, गारुड़े । १८३ अध्याये ।
"सप्तभिर्मन्त्रितं कृत्वा करवीरस्य पुष्पकम् ।
स्त्रीणामग्रे भ्रामयेच्च चणाद्धै सा वशा भवेत् ॥")

वशाढ्यकः, पुं, ( वशया आढ्यकः । प्रचुरवशावत्त्वात् तथात्वम् । ) शिशुमारः । इति शब्दरत्नावली ॥

वशापायी [ न् ], पुं, ( वशां पिबतीति । पा + णिनिः । ) कुक्कुरः । इति शब्दमाला ॥

वशि, स्त्री, ( वश + भावे इन् । ) वशित्वम् । इति शब्दमाला ॥

वशिकः, त्रि, शून्यम् । इत्यमरः । ३ । १ । ५६ ॥